निःसृता तत्र चाप्लुत्य चिरायुररगदो भवेत् ॥
तस्मात् पूर्व्वन्तु कुण्डात्तु ललिताख्या सरिद्वरा ।
सागराद्दक्षिणात् पूर्व्वं महादेवावतारिता ॥
वैशाखशुक्लपक्षस्य तृतीयायां नरस्तु यः ।
कुर्य्याद्वै ललितास्नानं स शम्भुसदनं व्रजेत् ॥
ललितायाः पूर्व्वतीरे भगवान्नाम पर्व्वतः ।
स्वयं विष्णुलिङ्गरूपी तत्रास्ति भगवान् हरिः ॥
ललितायां नरः स्नात्वा द्वादश्यां शुक्लपक्षके ।
भगवन्तं समारुह्य यो यजेत् परमेश्वरम् ।
स याति विष्णुभवनं शरीरेण विराजता ॥”
इति कालिकापुराणे ८९ अध्यायः ॥ * ॥
गोपीविशेषः । यथा,—
“अखिलरसामृतमूर्त्तिः
प्रसृमररुचिरुद्धतारका पालिः ।
कलितश्यामा ललितो
राधाप्रेयान् विधुर्जयति ॥
इति भक्तिरसामृतसिन्धुः ॥
ललिता श्यामला शैव्या पद्मा भद्रा च श्रूयन्ते ॥
इति तट्टीकायां जीवगोस्वामी ॥ तस्याः स्वरूपं
यथा,—
“या दुर्गा सैव ललिता ललिता सैव राधिका ।
एतासामन्तरं नास्ति सत्यं सत्यं हि नारद ! ॥”
इति पाद्मे पातालखण्डे रासलीलायां नारदं
प्रति श्रीकृष्णवाक्यम् ॥ रागिणीविशेषः । सा च
मेघरागस्य पत्नी । यथा, सङ्गीतदामोदरे ।
“ललिता मालसी गौड़ी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥”
(सा तु हनूमन्मते हिन्दोलरागस्य पत्नी । सोमे-
श्वरमते वसन्तस्य पत्नी । यथा, संगीतदर्पणे ।
“वेलावली रामकिरी देशाख्या पटमञ्जरी ।
ललिता सहिता एता हिन्दोलस्य वराङ्गनाः ॥”
“देशी देवकिरी चैव वराटी तोड़िका तथा ।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गनाः ॥”
अस्या ध्यानादिकमाह तत्रैव । अथ ललिता ।
“रि-प-वर्ज्या च ललिता औड़वा सत्रया मता ।
मूर्च्छना शुद्धमध्या स्यात् सम्पूर्णा केचिदूचिरे ।
धैवतत्रयसंयुक्ता द्वितीया ललिता मता ॥”
ध्यानम् । यथा,—
“प्रफुल्लसप्तच्छदमाल्यकण्ठा
सुगौरकान्तिर्युवती सुदृष्टिः ।
विनिश्वसन्ती सहसा प्रभाते
विलासवेशा ललिता प्रदिष्टा ।”
उदाहरणम् । स ग म ध नि स ।
अथवा,—
स रि ग म प ध नि स । इति प्रथमा ॥
ध नि स ग म ध । इति द्वितीया ।
इति ललिता ॥)

ललितासप्तमी, स्त्री, (ललिताख्या सप्तमी ।)
भाद्रशुक्लसप्तमी । तत्र कुक्कुटीव्रतं कार्य्यम् ।
यथा भविष्ये ।
“भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या ।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम् ।
पूजयेच्च तदा तस्यां दुष्प्रापं नैव विद्यते ॥”
इति कुक्कुटीव्रतत्वेन ख्यातम् । इति तिथ्यादि-
तत्त्वम् ॥ * ॥
तद्विधिर्यथा । तत्रादौ स्वस्तिवाचनपूर्व्वकं
सङ्कल्पं कुर्य्यात् । ॐ अद्येत्यादि भाद्रे मासि
शुक्ले पक्षे सप्तम्यान्तिथौ यावज्जीवनपर्य्यन्तं
अमुकगोत्रा श्रीमदमुकी शिवदुर्गाप्रीतिकामा
प्रतिवर्षीयभाद्रशुक्लसप्तम्यां गणेशादिदेवता-
पूजापूर्व्वकशिवपार्व्वतीपूजायावज्जीवनडोरक-
धारणभविष्यपुराणोक्तव्रतकथाश्रवणरूपललि-
तासप्तमीव्रतमहं करिष्ये । ततः सङ्कल्प-
सूक्तं पठित्वा सामान्यार्घ्यं विधाय गणेशादीन्
संपूज्य भूतशुद्ध्यादिकं विधाय मण्डलादिषु
पूजामारभेत । ततो ध्यात्वा स्वशिरसि पुष्पं
दत्त्वा मानसोपचारैः संपूज्य अर्घ्यं संस्थाप्य
पुनर्ध्यात्वा आवाहयेत् । शिवपूजाविधिना
शिवं दुर्गापूजाविधिना दुर्गाञ्च यथाशक्त्युप-
चारैः संपूज्य आवरणदेवान् पूजयेत् । ततो
ऽष्टग्रन्थियुक्तडोरकं दुग्धेन सिक्तं शिवदुर्गाभ्यां
अर्पयित्वा तत् डोरकं वामकरे बद्ध्वा भोज्य-
मुत्सृज्य कथां शृणुयात् । अष्टफलानि दद्यात् ।
ततो दक्षिणां दद्यात् ॥ * ॥ अथ कथा ।
श्रीकृष्ण उवाच ।
“लोमशो नाम देवर्षिर्मथुरामागतः पुरा ।
सोऽर्च्चितो वसुदेवेन देवक्या च युधिष्ठिर ! ॥
उपविष्टः कथाः पुण्याः कथयामास वै तदा ।
ततः कथयितुं भूयः कथामेतां प्रचक्रमे ॥
कंसेन निहताः पुत्रा जाता जाताः पुनः पुनः ।
मृतवत्सा देवकि ! त्वं पुत्त्रदुःखेन दुःखिता ॥
यथा चन्द्रमुखी दीना बभूव नहुषप्रिया ।
तथा त्वं देवकी भद्रे पुत्त्रदुःखेन दुःखिता ॥
पश्चाच्चीर्णव्रता सा तु बभूवाक्षयपुत्त्रिका ।
त्वमेव देवकी देवि ! भविष्यसि न संशयः ॥
देवक्युवाच ।
का सा चन्द्रमुखी दीना बभूव नहुषप्रिया ।
कथं चीर्णव्रतं सम्यक् तस्याः सन्ततिकारणम् ॥
लोमश उवाच ।
अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः ।
तस्य राज्ञो महादेवी नाम्ना चन्द्रमुखी प्रिया ॥
पुरोहितस्य तस्यैव पत्नी माला च नामिका ।
तयोरासीद्दृढ़प्रीतिः सुहृणीया परस्परम् ॥
अथ तेऽपि च मित्रिण्यौ स्नानार्थं सरयूजले ।
प्राप्ते प्राप्तास्तु तत्रैव बहुशो नगराङ्गनाः ॥
स्नातास्ता मण्डलं चक्रुस्तन्मध्ये यक्षरूपिणम् ।
लेखयित्वा शिवं शान्तसुमया सह शङ्करम् ॥
गन्धपुष्पाक्षतैर्भक्त्या पूजयित्वा यथाविधि ।
प्रणम्य शिरसा भक्त्या दृष्टास्ताभ्यां वरस्त्रियः ॥
किमिदं क्रियते साध्व्यः कथ्यतां यदि रोचते ।
कदा वा क्रियते किं वा फलं सम्यक् तदुच्यताम् ॥
स्त्रिय ऊचुः ।
पूजितोऽस्माभिरेतस्मिन् पार्व्वत्या सह शङ्करः ।
बद्ध्वा सूत्रमिदं शुभ्रं शिवस्यात्मा निवेदितः ॥
धारणीयमिदं तावद्यावत् प्राणस्य धारणम् ।
तासान्तु तद्वचः श्रुत्वा ते कृत्वा मानसं तथा ॥
कृत्वा च सम्मतिं तत्र बद्ध्वा दोर्भ्यां सुडोरकम् ।
ततस्ताः स्वगृहं जग्मुः सखीभिः परिवारिताः ॥
कालेन महता तत्र विस्मृतं तद्व्रतं नृप ! ।
प्रमत्तया चन्द्रमुख्या विस्मृतञ्च सुडोरकम् ॥
मृता केश्चिद्दहोरात्रैः सा बभूव प्लवङ्गमी ।
माला च कुक्कुटी जाता त्वसम्यग्व्रतपालनात् ॥
तथैव ते च मित्रिण्यौ जाते जातिस्मरे कुले ।
सम्भूय भूयस्तत्रैव प्राप्तश्च समयः पुनः ॥
तद्दिने तद्दिने प्राप्ते पुनः काले च ते मृते ।
अदेवमातृके देशे जाते गोकुलसङ्कुले ॥
राज्ञो जाया बभूवाथ पृथ्वीनाथस्य सा पुनः ।
ईश्वरी नाम विख्याता सा तु राज्ञोऽतिवल्लभा ॥
अग्निमीलद्विजस्यासीद्भार्य्या भूषणनामिका ।
पुरोहितस्य कालेन कुक्कुटी बहुपुत्त्रिणी ॥
जातिस्मरा चाष्टपुत्त्रा तथैव चामृतप्रजा ।
पुनर्निरन्तरा प्रीतिर्बभूवाथ तयोर्द्विज ॥
तत्रेश्वरी पुत्त्रमेकं प्रसूता तञ्च रोगिणम् ।
नववर्षे तु पञ्चत्वमगात्तत्र युधिष्ठिर ! ॥
तत्र तां भूषणा द्रष्टुमाजगामातिदुःखिता ।
सखीभावादतिस्नेहादष्टपुत्त्रसमन्विता ॥
अयुक्ताभरणा नित्यं स्वभावेनैव भूषिता ।
तां दृष्ट्वा पुत्त्रिणीं भव्यां प्रजज्वालेश्वरी रुषा ॥
ततो गृहं प्रेषयित्वा तां सखीं तीव्रमत्सरा ।
चिन्तयामास सा राज्ञी तस्याः पुत्त्रवधं प्रति ॥
हता हताश्च ये पुत्त्राः पुनर्ज्जीवन्त्यनामयाः ।
बहुपुत्त्रा जीववत्सा प्रयुक्ताभरणा कथम् ।
शोभसे ह्यधिकं भद्रे तड़ित् सौदामिनी यथा ॥
भूषणोवाच ।
भाद्रे मासि सिते पक्षे सप्तम्यां ललितालये ।
स्नात्वा शिवं लेखयित्वां मण्डले च सहाम्बि-
कम् ॥
संपूज्य विधिवत् प्राप्तं त्रैलोक्ये यच्च विद्यते ।
तदेव हि व्रतं पूर्व्वं त्वया सह मया कृतम् ॥
तन्मयाचरितं भक्त्या तेनाहं सुस्थिरा सखि ।
त्वया नाचरितं सम्यक् दर्पमात्तशरीरया ॥
तेन ते सन्ततिश्छिन्ना राज्ञ्येऽपि सति दुःखिता ।
प्रभाव एष कथितो व्रतस्यास्य मया सखि ! ॥
अहं तुभ्यं प्रदास्यामि तस्य धर्म्मस्य सुव्रते ।
सखीभावात् प्रतीच्छ त्वं नात्र कार्य्या विचा-
रणा ॥
संपूज्य शङ्करं भक्त्या करे बद्ध्वा सुडोरकम् ।
यावज्जीवं मया तावत् शिवस्यात्मा निवेदितः ॥
इत्येवं समयं कृत्वा ततः प्रभृति डोरकम् ।
स्वर्णरूप्यमयं वापि करशाखासु धारणम् ॥
शङ्करप्रीत्यै सार्द्धं सौवर्णं राजतन्तथा ।
ताम्रपात्रे प्रतिष्ठाप्य ब्राह्मणायोपपादयेत् ॥
पायसं पिष्टकञ्चैव भक्ष्यं भोज्यं प्रयत्नतः ।
सगोत्रान् भोजयित्वा तु स्वयं भुञ्जीत तत्परम् ॥
मण्डलं सोमसदृशं शिवस्यात्मनिवेदितम् ।
इत्येवं प्रतिजग्राह व्रतदानफलं ततः ॥